International Journal of Sanskrit Research 2024; 10(1): 319-321

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2024; 10(1): 319-321
© 2024 IJSR
www.anantaajournal.com
Received: 15-05-2024
Accepted: 21-06-2024

**डी. विद्याश्रीः**
शोधच्छात्रा, संस्कृतविभागः
उस्मानिया-विश्वविद्यालयः,
हैदराबादनगम्, तेलंगाना, भारत

**Corresponding Author:**
**डी. विद्याश्रीः**
शोधच्छात्रा, संस्कृतविभागः
उस्मानिया-विश्वविद्यालयः,
हैदराबादनगम्, तेलंगाना, भारत

# नित्येषु वेदेषु अनित्यः इतिहासः?

## डी. विद्याश्रीः

**प्रस्तावना**

भारतीयसंस्कृतौ वेदानां महन्महत्वं विद्यते। वेदानां विषये भारतीयविचारधारायाः मन्तव्यमस्ति यत् वेदाः नित्याः परमेश्वरस्य ज्ञानरूपाः सृष्ट्यादौ मानवानां मङ्गलाय परमेश्वरेण मानवेभ्यः प्रदत्ताः। महाभारतस्य शान्तिपर्वणि एवमुच्यते-

'अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा[1]।

एवंविधवेदेषु बहुत्र ऐतिहासिकपुरुषाणां नामानि सन्ति इव अनुभूयते। अनेन बहवः विद्वांसः मन्यन्ते यत् वेदेषु इतिहासः विद्यते इति। वेदेषु एवंविधानाम् ऐतिहासिकपुरुषाणां नामानि अवलोक्यन्ते- कुत्सः, शवैत्रेय-ऋषिः, वाक् अम्भृण ऋषिः (वागाम्भृणी), शुनःशेपः, अयास्यः, वरुण इत्यादयः। वेदानां सर्वानुक्रमणिरचयितृणां सायणादिभाष्यकाराणां मतेनापि वेदेषु इतिहासः स्वीकृतः इति केषाञ्चित् विदुषां मतम् अस्ति।
वेदाः नित्याः उच्यन्ते। इतिहासः अनित्यः भवति। नित्येषु वेदेषु अनित्यः इतिहासः न सम्भवति इति वेदनित्यत्ववादिनां बहूनां वैदिकानां मतम्। वेदेषु यत्रापि ऐतिहासिकशब्दाः दृश्यन्ते तत्र कथाः विचित्रतया वर्णिताः सन्ति। तत्र न कस्यापि देशस्य, न कस्यापि जातेः उत न कस्यापि राज्ञः क्रमबद्धेतिहासः दृश्यते। महर्षिदयानन्दस्य ऋग्वेदादिभाष्यभूमिकायां वेदेषु इतिहासः वर्तते न वा इति विस्तृता चर्चा कृता अवलोक्यते। वेदसंज्ञाविचारः इति प्रकरणे एवं चर्चा विद्यते- 'यथा ब्राह्मणग्रन्थेषु मनुष्याणां नामलेखपूर्वका लौकिका इतिहासाः सन्ति न चैवं मन्त्रभागे। किञ्च भोः!

त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम्।
यद्देवेषु त्र्यायुषं तन्नो अस्तु त्र्यायुषम्॥ यजुर्वेदः- ३,६२

इत्यादीनि वचनान्यृषीणां नामाङ्कितानि यजुर्वेदादिष्वपि दृश्यन्ते। अनेनेतिहासादिविषये मन्त्रब्राह्मणयोस्तुल्यता दृश्यते, पुनर्ब्राह्मणानामपि वेदसंज्ञा कुतो न मन्यते? मैवं भ्रमि। नैवात्र जमदग्निकश्यपौ देहधारिणो मनुष्यस्य नाम्नी स्तः। अत्र प्रमाणम्-

चक्षुर्वै जमदग्निर्ऋषिर्यदनेन जगत्पश्यत्यथो मनुते तस्माच्चक्षुर्जमदग्निर्ऋषिः। शतपथब्राह्मणम्- ८,१,२,३
कश्यपो वै कूर्मः, प्राणो वै कूर्मः। शतपथब्राह्मणम्- ७,५,१,५-७

अनेन प्राणस्य कूर्मः कश्यपश्च संज्ञास्ति। शरीरस्य नाभौ तस्य कूर्माकारावस्थितेः'[2]।
एवंप्रकारेण कश्यपशब्दस्य प्राणसंज्ञा अपि भवति इति महर्षिदयानन्दः प्रमाणानि दर्शयति। अतः तस्य मतेन कश्यपशब्देन ऐतिहासिक-ऋषिविशेषस्य ग्रहणं न भूत्वा प्राणानां संज्ञारूपेण कश्यपशब्दस्य ग्रहणं भवति।

तथैव अग्रेऽपि अस्य 'त्र्यायुषं जमदग्नेः–' इति मन्त्रस्य व्याख्या एवं कृता महर्षिदयानन्देन-

'अनेन मन्त्रेणेश्वर एव प्रार्थ्यते। तद्यथा- हे जगदीश्वर! भवत्कृपया नोऽस्माकं जमदग्निसंज्ञकस्य चक्षुषः कश्यपाख्यस्य प्राणस्य च (त्र्यायुषम्) त्रिगुणमर्थात् त्रीणि शतानि वर्षाणि यावत्तावदायुरस्तु। चक्षुरित्युपलक्षणमिन्द्रियाणां प्राणो मन-आदीनां च (यद्देवेषु त्र्यायुषम्) अत्र प्रमाणम्-

**विद्वांसो हि देवाः**- शतपथब्राह्मणम्- ३,७,३,१
अनेन विदुषां देवसंज्ञास्ति, देवेषु विद्वत्सु यावद्विद्याप्रभावयुक्तं त्रिगुणमायुर्भवति, (तन्नो अस्तु त्र्यायुषम्) तत्सेन्द्रियाणां समनस्कानां नोऽस्माकं पूर्वोक्तं सुखयुक्तं त्रिगुणमायुरस्तु भवेत्। येन सुखयुक्ता वयं तावदायुर्भुञ्जीमहि। अनेनान्यदप्युपदिश्यते।

ब्रह्मचर्यादिसुनियमैर्मनुष्यैरेतत्त्रिगुणमायुः कर्तुं शक्यमस्तीति गम्यते'[3]।

**एवंप्रकारेण महर्षिदयानन्दः** त्र्यायुषं जमदग्नेः– इत्यस्य मन्त्रस्य ईश्वरप्रार्थनायुतां व्याख्यां विहितवान्। तस्य मतेन जमदग्निः चक्षुरुच्यते। (त्र्यायुषं जम-) हे जगदीश्वर! भवतः अनुग्रहेण अस्माकं प्राणादि-अन्तःकरणानां नेत्रादि-इन्द्रियाणां त्रिशतवर्षपर्यन्तं आयुः भवेत्। (यद्देवेषु) अत्र देवाः इत्यनेन विद्वांसः गृह्यन्ते। यथा विद्वत्सु विद्यादिशुभगुणाः सुदीर्घायुः च विद्यन्ते तथैव अस्माकमपि भवेदिति प्रार्थ्यते।
**मनुष्यः** ब्रह्मचर्यादि-उत्तमनियमानां पालनेन निजम् आयुः त्रिगुणं चतुर्गुणं वा कर्तुं शक्नोति अर्थात् त्रिशतवर्षाणि चतुश्शतवर्षाणि वा सुखपूर्वकं जीवितुं शक्नोति।

**'अतोऽर्थाभिधायकैर्जमदग्न्यादिभिः** शब्दैरर्थमात्रं वेदेषु प्रकाश्यते। अतो नात्र मन्त्रभागे हीतिहासलेशोऽप्यस्तीत्यवगन्तव्यम्। अतो यच्च सायणाचार्यादिभिः वेदप्रकाशादिषु यत्र कुत्रेतिहासवर्णनं तद् भ्रममूलमस्तीति मन्तव्यम्'[4]।
**एवंप्रकारेण वेदेषु सत्य-अर्थ-वाचक-शब्दैः** सत्यविद्यानां प्रकाशः क्रियते न तु लौकिक-इतिहासानां प्रकाशः क्रियते इति महर्षिदयानन्दस्य अभिप्रायः वर्तते। तथैव सायणादि-आचार्याः स्वरचित-भाष्य-ग्रन्थेषु यत्र यत्र वेदेषु इतिहासः वर्तते इति वर्णनं कृतवन्तः, तत्सर्वं भ्रममूलकमस्तीति अस्य अभिमतम्।
**बृहद्देवताकारः** सर्वानुक्रमणिरचयिता सायणाचार्यादयः च वेदभाष्यकाराः वेदम् ईश्वरीयज्ञानत्वेन अङ्गीकुर्वन्ति। सायणाचार्यः स्वकीयवेदभाष्यस्य आरम्भे वेदानां विषये एवमुक्तवान्-

’यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्[5]॥

**एवं सायणाचार्यः वेदान् परमात्मनः** निःश्वसितान् ज्ञापयति। अनेन प्रतीयते यत् सायणाचार्यः अपि वेदानां नित्यत्वं मन्वानः अनित्यरूपः मनुष्याणाम् इतिहासः वेदे न सम्भवति इति मन्यते स्म। यतो हि सायणाचार्यः स्वयम् ऋग्वेदभाष्यस्य उपोद्घाते वेदे कस्यापि व्यक्तिविशेषस्य इतिहासः नास्ति इति वदति-

’यदप्युक्तं प्रमगन्दाद्यनित्यार्थसंयोगान्मन्त्रस्य अनादित्वं न स्यादिति, तत्रोत्तरं सूत्रयति- उक्तश्चानित्यसंयोगः (जैमिनिसूत्रम्- १,२,५०) इति। प्रथमपादस्यान्तिमाधिकरणे सोऽयमनित्यसंयोगदोष उक्तः परिहृतः। तथा हि तत्र पूर्वपक्षे वेदानां पौरुषेयत्वं वक्तुं काठकं कालापकमित्यादिपुरुषसम्बन्धाभिधानहेतुकृत्य अनित्यदर्शनाच्च (जैमिनिसूत्रम्- १,१,२८) इति हेत्वन्तरं सूत्रितम्। तस्यायमर्थः- बबर प्रावाहणिरकामयत (तै.सं. ७,१,१०,२) इत्यनित्यानां बबरादीनामर्थानां दर्शनात् ततः पूर्वमसत्वात् पौरुषेयो वेद इति। तस्योत्तरमेवं सूत्रितम्- परं तु श्रुतिसामान्यमात्रम् (जैमिनिसूत्रम्- १,१,३१) इति। तस्यायमर्थः यत्काठकादिसमाख्यानं तत्प्रवचननिमित्तम्। यत्तु परं बबराद्यनित्यदर्शनं तच्छब्दसामान्यमात्रम्। न तु तत्र अनित्यो बबराख्यः कश्चित् पुरुषो विवक्षितः। किन्तु बबर इति शब्दानुकृतिः। तथा सति बबरेति शब्दं कुर्वन् वायुरभिधीयते। स च प्रावाहणिः प्रकर्षेण वहनशीलः। एवमन्यत्राप्यूहनीयम्[6]।

एवंप्रकारेण ऋग्वेदभाष्योपोद्घाते श्रीसायणाचार्यः स्वयं मीमांसाकारस्य मतं प्रमाणरूपेण प्रदर्शयति यत् वेदेषु अनित्यानां मनुष्याणाम् इतिहासः न सम्भवति इति। अनेन ज्ञायते यत् सायणाचार्यः स्वयं वेदानां नित्यत्वम् अपौरुषेयत्वं च स्वीकरोति। एवंप्रकारेण नित्येषु वेदेषु अनित्यस्य इतिहासस्य कल्पना न युक्ता इति विदुषां मतम् अवलोक्यते।

**सन्दर्भ सूची**


1. महाभारतम्, शान्तिपर्व- २३२,२४
2. महर्षिदयानन्दरचिता ऋग्वेदादिभाष्यभूमिका, वेदसंज्ञाविचारः
3. महर्षिदयानन्दरचिता ऋग्वेदादिभाष्यभूमिका, वेदसंज्ञाविचारः
4. महर्षिदयानन्दरचिता ऋग्वेदादिभाष्यभूमिका, वेदसंज्ञाविचारः
5. श्रीसायणाचार्यविरचिता ऋग्वेदादिभाष्यभूमिका, पृष्ठसंख्या- २
6. श्रीसायणाचार्यविरचिता ऋग्वेदादिभाष्यभूमिका, पृष्ठसंख्या- २९-३०
7. महाभारत, शान्तिपर्व, हिन्दी अनुवाद सहित, गीताप्रेस, गोरखपुर,
8. महर्षिदयानन्दरचित ऋग्वेदादिभाष्यभूमिका, सार्वदेशिक आर्य प्रतिनिधि सभा, रामलीला मैदान, दिल्ली, १९८२
9. श्रीसायणाचार्यरचित ऋग्वेदादिभाष्यभूमिका, चौखम्बा ओरियन्टालिया, वाराणसी, १९८०